Written in 1996 in Sanskrit language in the classical metre of Vasanta Tillakam, by PVR Narasimha Rao

# नवग्रह करावलंब स्तोत्रम्

ज्योतीश देव भुवनत्रय मूलशक्ते ।
गोनाथ भासुर सुरादिभिरीड्यमान ।
नृणांश्च वीर्यवरदायक आदिदेव ।
आदित्य वेद्य मम देहि करावलंबम् ॥

नक्षत्रनाथ सुमनोहर शीतलांशो ।
श्रीभार्गवीप्रियसहोदर श्वेतमूर्ते ।
क्षीराब्धिजात रजनीकर चारुशील ।
श्रीमच्छशांक मम देहि करावलंबम् ॥

रुद्रात्मजात बुधपूजित रौद्रमूर्ते ।
ब्रह्मण्य मंगल धरात्मज बुद्धिशालिन् ।
रोगार्तिहार ऋणमोचक बुद्धिदायिन् ।
श्रीभूमिजात मम देहि करावलंबम् ॥

सोमात्मजात सुरसेवित सौम्यमूर्ते ।
नारायणप्रिय मनोहर दिव्यकीर्ते ।
धीपाटवप्रद सुपंडित चारुभाषिन् ।
श्री सौम्यदेव मम देहि करावलंबम् ॥

वेदांतधीतिपरिषिक्त बुधदिवेद्य ।
ब्रह्मादिवंदित गुरो सुरसेवितांघ्रे ।
योगीश ब्रह्मगुणभूषित विश्वयोने ।
वागीश देव मम देहि करावलंबम् ॥

उल्लासदायक कवे भृगुवंशजात ।
लक्ष्मीसहोदर कलात्मक भाग्यदायिन् ।
कामादिरागकर दैत्यगुरो सुशील ।
श्रीशुक्रदेव मम देहि करावलंबम् ॥

द्वेषैषणारहित शाश्वत कालरूप ।
छायासुनंदन यमाग्रज क्रूरचेष्ट ।
कष्टाद्यनिष्टकर धीवर मंदगामिन् ।
मार्तांडजात मम देहि करावलंबम् ॥

मार्तांडपूर्णशशिमर्दक रौद्रवेष ।
सर्पाधिनाथ सुरभीकर दैत्यजन्म ।
गोमेधिकाभरणभासित भक्तिदायिन् ।
श्रीराहुदेव मम देहि करावलंबम् ॥

आदित्यसोमपरिपीडक चित्रवर्ण ।
हे सिंहिकातनय वीर भुजंगनाथ ।
मंदस्य मुख्यसख धीवर मुक्तिदायिन् ।
श्रीकेतुदेव मम देहि करावलंबम् ॥

मार्तांडचंद्रकुजसौम्यबृहस्पतीनाम् ।
शुक्रस्य भास्करसुतस्य च राहुमूर्तेः ।
केतोश्च यः पठति भूरि करावलंब ।
स्तोत्रम् स यातु सकलाम्श्च मनोरथारान् ॥

ॐ शांतिः शांतिः शांतिः

ॐ तत् स्त्

navagraha karāvalamba stotram

jyotīśa deva bhuvanatraya mūlaśakte ।
gonātha bhāsura surādibhirīḍyamāna ।
nṝṇāṁśca vīryavaradāyaka ādideva ।
āditya vedya mama dehi karāvalambam ।।

nakṣatranātha sumanohara śītalāṁśo ।
śrībhārgavīpriyasahodara śvetamūrte ।
kṣīrābdhijāta rajanīkara cāruśīla ।
śrīmacchaśāṅka mama dehi karāvalambam ।।

rudrātmajāta budhapūjita raudramūrte ।
brahmaṇya maṅgala dharātmaja buddhiśālin ।
rogārtihāra ṛṇamocaka buddhidāyin ।
śrībhūmijāta mama dehi karāvalambam ।।

somātmajāta surasevita saumyamūrte ।
nārāyaṇapriya manohara divyakīrte ।
dhīpāṭavaprada supaṇḍita cārubhāṣin ।
śrī saumyadeva mama dehi karāvalambam ।।

vedāntadhītipariṣikta budhadivedya।
brahmādivandita guro surasevitāṅghre ।
yogīśa brahmaguṇabhūṣita viśvayone ।
vāgīśa deva mama dehi karāvalambam ।।

ullāsadāyaka kave bhṛguvaṁśajāta ।
lakṣmīsahodara kalātmaka bhāgyadāyin ।
kāmādirāgakara daityaguro suśīla ।
śrīśukradeva mama dehi karāvalambam ।।

dveṣaiṣaṇārahita śāśvata kālarūpa ।
chāyāsunandana yamāgraja krūraceṣṭa ।
kaṣṭādyaniṣṭakara dhīvara mandagāmin ।
mārtāṇḍajāta mama dehi karāvalambam ।।

mārtāṇḍapūrṇaśaśimardaka raudraveṣa ।
sarpādhinātha surabhīkara daityajanma ।
gomedhikābharaṇabhāsita bhaktidāyin ।
śrīrāhudeva mama dehi karāvalambam ।।

ādityasomaparipīḍaka citravarṇa ।
he siṁhikātanaya vīra bhujaṅganātha ।
mandasya mukhyasakha dhīvara muktidāyin ।
śrīketudeva mama dehi karāvalambam ।।

mārtāṇḍacandrakujasaumyabṛhaspatīnām ।
śukrasya bhāskarasutasya ca rāhumūrteḥ ।
ketośca yaḥ paṭhati bhūri karāvalamba ।
stotram sa yātu sakalāṁśca manorathārān ।।

om śāntiḥ śāntiḥ śāntiḥ
om tat sat